Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

# संस्कृत - साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १५७
जुन - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### गवां मध्ये वसाम्यहम्

आर्यसंस्कृतेः त्रीणि लक्षणानि चित्तं हरन्ति –

१. तुलसी केवलः वनस्पतिः नास्ति, अपि तु विष्णुप्रिया अस्ति।

२. गङ्गाजलं केवलं जलं ($H_2O$) नास्ति, तत् तु लोकमातुः प्रस्रवणम् अस्ति।

३. धेनुः केवलः पशुः नास्ति, सा तु जीवनदायिनी माता अस्ति।

निघण्टुकारः वेदेषु पठ्यमानानि अघ्न्या, उस्रा, उस्रिया, अही, मही, अदितिः, इळा, जगती, शक्करी इति गोः नव नामानि निर्दिशति । इतरेषु कोशग्रन्थेषु गोसम्बद्धाः अनेके शब्दाः उपलभ्यन्ते । एवं साहित्यस्य परिशीलनेन ज्ञायते यत् भारते गोसंस्कृतिः शरच्चन्द्रिका इव सुतरां प्रकाशते।

श्रीमणिभाई देसाई विलक्षणः गोभक्तः आसीत् । महात्मनः गान्धिनः आज्ञां शिरसि निधाय सः आजीवनं गोसेवां कृतवान् । सः श्रीमतः जमनालालबजाजस्य साहाय्येन गवां रक्षणम् उद्दिश्य राष्ट्रियं सम्मेलनं वर्धायाम् आयोजितवान्। गान्धी अपि तत्र उपस्थितः । ततः गान्धिवर्यः मञ्चे लम्बिते फलके 'गोरक्षा' शब्दं पठित्वा तस्य विरोधं प्रदर्शितवान्। गान्धी उक्तवान् – 'गवां रक्षकाः वयं के ? वयं रक्षणं न कुर्मः, प्रत्युत गावः अस्माकं रक्षणं कुर्वन्ति।' तस्मिन् दिवसे भारते गोसेवासङ्घस्य स्थापना अभवत्। गान्धिमहोदयः गवां महत्त्वं जानाति स्म। अद्यतनाः गोसेवकाः तत् विस्मृतवन्तः।

गोपालः सुतरीया कर्णावत्यां क्रियाशीलः गोभक्तः वर्तते। गाः आश्लिष्य वसतः तस्य जीवनसूत्रम् अस्ति 'गवां मध्ये वसाम्यहम् ।' सः सश्रद्धं कथयति – 'अस्माकं प्राङ्गणे वर्तमानाः गावः सन्तुष्टाः चेत् जीवनं धन्यम् ।' गोपालवर्यः वन्ध्याः गाः अपि निर्विशेषेण पालयति। तथाविधस्य पुण्यकर्मणः प्रतिबिम्बं वयं तस्य निरामये जीवने द्रष्टुं शक्नुमः।

अद्यतनं भारतीयं मानसं बहुधा काल्पनिकम् अस्ति। तस्मात् कारणात् अस्माकं देशे भक्तिः फलप्रदा नास्ति। गोपुच्छं पावनं मन्यमानः मनुष्यः गोसेवायाः दूरे तिष्ठति । गोपालनेन पुष्टिं प्राप्तः जनः म्रियमाणाम् अस्थिशेषां धेनुं दृष्ट्वा न लज्जते । एषा सांस्कृतिकी विडम्बना अस्ति । गोपूजा कोऽपि कर्मकाण्डस्य विषयः नास्ति । 'गोसेवा एव गोपूजा' सूत्रं वयं कदा ज्ञास्यामः ? भविष्यत्काले वैदेशिकाः गोमाहात्म्यं सम्यक् ज्ञास्यन्ति । ते गोपालनं प्रारप्स्यन्ते । तदा गोहीनाः भारतभक्ताः लेखकाः सगौरवं लेखिष्यन्ति– 'धेनुः भारतीयः पशुः अस्ति !' यदा काञ्चित् मोहिनीं पुरस्कृत्य वैदेशिकं गोदुग्धं हस्ते पतिष्यति तदा अस्माकं युवकाः तत् ताम्बूलगृहे आस्वादयन्तः उच्चैः घोषणां करिष्यन्ति – 'तुफानी ठण्डा !!'

# अजपालकस्य उत्तरम्



पूर्वं कश्चन राजा आसीत्। तस्य सम्पत्तिः महती । सा सम्पत्तिः न सुवर्णरजतादिमुद्रारूपेण, अपि तु धेनुगजाश्वोष्ट्रादिरूपेण।

कदाचित् सः सर्वान् सेवकान् अधिकारिणः च आज्ञापितवान् यत् अमुके दिने अमुके मुहूर्ते मेलनीयम् इति। एतस्य मेलनस्य कारणं किम् इति तेन न सूचितम् आसीत् । अतः सेवकाः अधिकारिणः च कारणविषये परस्परं चर्चां कृतवन्तः, स्वमत्यनुगुणम् 'एतत् एव कारणं स्यात्' इति ऊहां कृतवन्तः च।

निश्चिते दिने सर्वे सम्मिलिताः। राजा गाम्भीर्येण सभां प्रविश्य अपृच्छत् – "किं सर्वे उपस्थिताः ?" इति।

सभायां मौनं प्रसृतम् आसीत्।

राजा सभां सकृत् दृष्ट्वा अवदत् – " भवतां सर्वेषां मौनतः अहम् अवगच्छामि यत् कोऽपि अनुपस्थितः नास्ति इति। अहं कमपि प्रश्नं प्रष्टुम् इच्छामि। तस्य उत्तरम् एकैकेन अपि दातव्यम् इति मम इच्छा" इति।

क्षणकालं सभायां नीरवता प्रसृता। राजा पुनः अवदत् – "मम मनसि किम् अस्ति इति किं भवन्तः वक्तुम् अर्हन्ति ?" इति।

ततः तत्रत्येषु एकैकः अपि अग्रे आगत्य राज्ञः पुरतः स्थित्वा स्वमत्यनुगुणम् उत्तरम् अवदत्। किन्तु तैः उत्तरैः राजा न सन्तुष्टः। सः शिरश्चालनेन तेषाम् उत्तरं निराकृतवान्। राज्ञः मुखं गम्भीरम् आसीत्। अतः तत्र कोपः अस्ति, उत असन्तोषः तिष्ठति, उताहो चिन्ताबाधा दृश्यते, आहोस्वित् परमशान्तता आवसति इति वक्तुं कोऽपि न अशक्नोत्।

सर्वेषां कथनस्य अनन्तरं राजा सभासदः उद्दिश्य अवदत् – "भवद्भिः उक्तम् एकमपि उत्तरं मम सन्तोषाय न जातम्। भवन्तः स्वीयेषु कार्येषु प्रवृत्ताः भवितुम् अर्हन्ति" इति।

मन्त्री सभाभवनस्य कोणे स्थित्वा सर्वमपि पश्यन् मौनेन स्थितवान् आसीत्। राजा तं स्वसमीपम् आहूय आदिशत् – "मम मनसि स्थितं यः अवगन्तुं शक्नुयात् तादृशः जनः मासाभ्यन्तरे अन्विष्य आनेतव्यः भवता। यदि एतत् कर्तुं न शक्येत तर्हि भवान् मन्त्रिपदवीतः च्युतः भवेत्" इति। एतावत् आदिश्य अन्तःपुरं प्रति गतवान् राजा।

मन्त्रिणः महती चिन्ता आरब्धा। 'राज्ञः मनसि किं प्रवर्तते इति ज्ञातुं समर्थः जनः मया कुत्र अन्वेष्टव्यः ?

तादृशः जनः कोऽपि अस्ति ?' इति बहुधा चिन्तितवान् मन्त्री। तथापि तादृशस्य प्राप्त्यर्थं मार्गः कोऽपि न प्राप्तः। रात्रौ यद्यपि तेन शयनं कृतं तथापि चिन्ताभारकारणतः निद्रा किञ्चिदपि न प्राप्ता।

अनन्तरदिने प्रातः उत्थाय सः तादृशस्य जनस्य अन्वेषणाय उद्युक्तः। यः यः मार्गे मिलितः तं तं सः स्वस्य समस्यां न्यवेदयत्। किन्तु कोऽपि तस्य साहाय्ये न समर्थः। केचन एतद्विषये अज्ञाः आसन्। पुनः केचन राज्ञः सम्बद्धे एतस्मिन् व्यवहारे प्रवृत्तिं दर्शयितुं न इष्टवन्तः। मन्त्री सर्वत्र अटितवान्। कुतश्चित् अपि साहाय्यं न प्राप्तं तेन।

दिनानि यथा यथा गतानि तथा तथा तदीया निद्रा अपि अपगता। शय्यायाम् उपविश्य निरन्तरं चिन्तां करोति स्म सः। आहारः अपि न रोचते स्म तस्मै। आहारं सेवताम् इति पत्नी अनुरोधं करोति स्म। किन्तु कवलमात्रम् आहारसेवनम् अपि निराकरोति स्म सः।

कदाचित् पितुः एतां दुरवस्थां दृष्टवती तदीया पुत्री पृष्टवती– "तात ! का चिन्ता भवतः ? किमर्थम् एवम् आदिनं चिन्ता क्रियते ? किमर्थं निद्राहारादिकं भवते न रोचते ? कृपया मां सर्वं वदतु" इति।

किन्तु मन्त्री मौनम् आश्रितवान्। अनन्तरदिने स्नाने अपि अरुचिं दर्शितवान् सः। एतत् सर्वथा असहमाना पुत्री उक्तवती– "तात ! यदि भवता एवं स्नानाहारादिकं निराक्रियेत तर्हि अहं मम माता चापि आहारसेवनं न करिष्यावः। भवन्तं या चिन्ता बाधते तां भवान् मां वदेत् एव। अहं कदाचित् तस्याः परिहारोपायं सूचयितुं शक्नुयाम् अपि" इति।

मन्त्री झटिति उत्थाय उपविष्टवान्। 'भवतः चिन्तायाः परिहारं कर्तुं प्रयत्नं करिष्यामि' इति अद्यावधि तं कोऽपि न उक्तवान् आसीत्। अतः पुत्र्याः वचनेन सः नितरां सन्तुष्टः। व्यथामिश्रितेन स्वरेण सः राज्ञः आज्ञां कालमितिं च अश्रावयत्।

"इतोऽपि कति दिनानि अवशिष्टानि ?" इति अपृच्छत् पुत्री।

"दिनं दिनद्वयं वा अवशिष्टं स्यात्" इति उक्तवान् मन्त्री।

"स्पष्टतया कति दिनानि अवशिष्टानि इति भवान् वदति। तदभ्यन्तरे अहं राज्ञा सूचितं जनम् आनेष्यामि। इदानीम् उत्थाय भवान् स्नात्वा अस्माभिः सह आहारं सेवताम्। शिष्टम् अनन्तरं चिन्तयिष्यामः" इति अनुरोधपूर्वकम् उक्त्वा पितरम् उत्थापितवती पुत्री।

भोजनसमये मन्त्री अवदत्– "परश्वः एव मया राज्ञः पुरतः सः जनः उपस्थापनीयः। तदभ्यन्तरे भवती तादृशं विशिष्टं जनं कुतः आनयेत् ?" इति।

"परश्वः खलु भवता तादृशः कश्चन जनः नेतव्यः ? तात ! अलं चिन्तया। तदभ्यन्तरे अहं तादृशं जनम् आनीय भवतः पुरतः उपस्थापयिष्यामि" इति आत्मविश्वासपूर्वकम् उक्तवती पुत्री।

पुत्री तादृशस्य जनस्य अन्वेषणाय कुत्रापि न गतवती एव। तैः पालितानाम् अजादीनां पालकः कश्चन तरुणः आसीत्। सः स्वयं त्रीन् मेषान् पालयति स्म अपि। सः बधिरः मूकश्च आसीत्। सा तम् आहूय भोजनादिकं दत्त्वा अभिनयेन सूचितवती यत् भवता मम पित्रा सह राजास्थानं प्रति गन्तव्यम् इति। सः अजपालकः

शिरश्चालनपूर्वकम् एतत् अङ्गीकृतवान्।

यदा राजास्थानं प्रति प्रस्थानस्य समयः आगतः तदा पुत्री तम् अजपालकं पितुः पुरतः उपस्थापितवती। तं दृष्ट्वा आश्चर्यम् अनुभवन् मन्त्री पुत्रीम् अवदत् – "वत्से! एषः मूकः बधिरश्च खलु!" इति।

" तात! अलं चिन्तया। विना चिन्ताम् एतम् आत्मना सह नयतु भवान्। राज्ञः मनसि किम् अस्ति इति एषः सूचयिष्यति" इति सविश्वासम् अवदत् पुत्री।

पुत्र्यां विशेषविश्वासः आसीत् मन्त्रिणः । अतः सः आत्मना सह तस्य अजपालकस्य नयनम् अङ्गीकृतवान्। ततः तौ राजास्थानं प्रति गतवन्तौः।

मन्त्री कीदृशं जनम् आनयेत् इति द्रष्टुम् असंख्याः जनाः तस्मिन् दिने राजास्थाने उपस्थिताः आसन्। 'अहम् आगतः अस्मि' इति वार्तां प्रेषितवान् मन्त्री। राजा आगत्य सिंहासने उपविष्टवान्। मन्त्री तं नमस्कृतवान्। अजपालकः अपि राजानं नमस्कृतवान्। राजा किमपि अवदन् एकाम् अङ्गुलिं दर्शितवान्। सः अजपालकः अङ्गुलिद्वयं दर्शितवान्। राजा मन्दहासं दर्शयन् अङ्गुलित्रयं दर्शितवान्। अजपालकः निराकरणपूर्वकं शिरः चालयन् पुनरपि अङ्गुलिद्वयम् एव दर्शितवान्।

राज्ञः मुखे तृप्तिसूचकः मन्दहासः उत्पन्नः। "मन्त्रिवर्य! भवता अद्वितीयः एव जनः आनीतः। एतेन यथायोग्यम् उत्तरं दत्तम् अस्ति। एतादृशम् आनीतवन्तं भवन्तं विशेषतः अभिनन्दामि" इति अवदत् सः।

"अनुगृहीतः अस्मि महाराज!" इति विनयेन नमस्कृत्य मन्त्री अवदत् – "प्रभो! भवता किं पृष्टं, तेन च कीदृशम् उत्तरं दत्तम् इत्येतत् ज्ञातुं मम, अत्र सम्मिलितानां च महत् अस्ति कुतूहलम्। यदि न आक्षेपः, तर्हि कृपया विव्रियताम्" इति।

"अत्र न किमपि विशेषरहस्यम्। एकाम् अङ्गुलिं दर्शयता मया सूचितं यत् अहम् अद्वितीयः प्रभुः अस्मि इति। तदा तेन अङ्गुलिद्वयं दर्शयता स्मारितं यत् भवान् जगत्प्रभुः चेति ऊभौ प्रभू स्तः इति। 'तृतीयः अपि किम् अस्ति?' इति ज्ञातुं मया अङ्गुलित्रयं दर्शितम्। 'तृतीयः कोऽपि नास्ति। भवन्तौ एव प्रभू' इति अङ्गुलिद्वयदर्शनेन तेन उक्तम्। मम मनसि यत् अस्ति तत् सम्यक् एव अवगतम् अस्ति तेन। तीक्ष्णमतिः अस्ति अयम्" इति विवृतवान् राजा।

मन्त्रिणे अजपालकाय च योग्यम् उपायनं दत्त्वा तौ प्रेषितवान् राजा। गृहं प्रत्यागत्य मन्त्री पुत्र्याः साहाय्येन अजपालकम् अपृच्छत् यत् राज्ञः मनसि किम् अस्ति इति भवता कथं ज्ञातम् इति। तदा सः अजपालकः अभिनयेन असूचयत् – "भवता किम् एकः मेषः विक्रीयेत इति राज्ञा पृष्टम्। भवान् राजा इत्यतः उभौ मेषौ विक्रेतुम् अर्हामि इति मया सूचितम्। यदा सः हस्तसङ्केतेन असूचयत् यत् अहं भवतः त्रीन् अपि मेषान् क्रेतुम् इच्छामि इति, तदा मया निराकरणपूर्वकं सूचितं यत् उभौ एव मेषौ अहं विक्रेतुं सिद्धः" इति।

एतत् श्रुत्वा मन्त्री तत्पुत्री च मनःपूर्वकं हसितवन्तौ। 'राज्ञा किमपि पृष्टम्। एतेन अन्यदेव उक्तम्। तथापि अहं तु रक्षितः अभवम्। देवो दयालुः' इति स्वगतम् अवदत् मन्त्री।

# मासवार्ता

**धन्यवादः...**

संस्कृतसाम्प्रतं पत्रिका त्रयोदशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा चतुर्दशे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः ।

सम्पादकः

## सम्पन्नः संस्कृतग्रीष्मवर्गः





मईमासस्य ६ दिनाङ्कतः १६ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थाने संस्कृतग्रीष्मवर्गस्य आयोजनम् अभवत् । वर्गेऽस्मिन् नवमकक्ष्यायाः दशमकक्ष्यायाः च छात्राणां कृते संस्कृतव्याकरणवर्गाणाम् आयोजनम् अभवत् । एतेषु वर्गेषु ६० छात्राः संस्कृतव्याकरणस्य अध्ययनम् अकुर्वन् । अत्र उल्लेखनीयं यत् एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं ग्रीष्मावकाशे संस्कृतग्रीष्मवर्गस्य आयोजनं करोति । अनेन प्रकारेण एव दिपावल्याः अवकाशेऽपि दिपावलीवर्गस्य आयोजनं भविष्यति ।

## कृपया हसन्तु

पतिः- (पत्नीम् उद्दीश्य) मम विस्मरणशीलस्वभावं दृष्ट्वा भवती सर्वदा मां 'विस्मरणशीलः' इति वदति । पश्यतु अहं मम एतां समस्यां निवारयितुं 'स्मरणशक्तेः औषधम्' इति पुस्तकं क्रीतवान् ।

पत्नी- भोः विस्मरणशील ! एतत् पुस्तकं भवान् दशमवारं क्रीत्वा आनितवान् अस्ति । एतस्य पुस्तकस्य पूर्वक्रीताः नव प्रतयः कपाटिकायां वर्तन्ते ।

★ ★ ★ ★ ★

कश्चन भिक्षुकः भिक्षां याचितुम् एकम् आपणम् अगच्छत् । तत्र गत्वा सः आपणिकाय अकथयत् – "वस्तुतः अहं लेखकः अस्मि । गतसप्ताहे एव मम एकं पुस्तकं प्रकाशितं वर्तते ।" एतत् श्रुत्वा -

आपणिकः - पुस्तकस्य नाम किम् अस्ति ?

भिक्षुकः - धनार्जनस्य १०१ उपायाः ।

आपणिकः - तर्हि भिक्षां किमर्थं याचते ?

भिक्षुकः - तेषु १०१ उपायेषु एषः अपि एकः उपायः वर्तते ।

★ ★ ★ ★ ★

कश्चन कविः तस्य पत्न्यै अकथयत् - "मया द्वे कविते रचिते स्तः । द्वयोः कतमा कविता श्रेष्ठा इति अहं ज्ञातुम् इच्छामि..... ।"

"अस्तु, भवान् उभेऽपि कविते मां श्रावयतु" इति सोत्साहम् अवदत् पत्नी ।

यदा कविः एकां कविताम् अश्रावयत् तदैव जृम्भन्ती पत्नी अवदत् – " भवतः द्वितीया कविता एव श्रेष्ठा अस्ति ।"

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**उष्ट्रकस्य विवाहे तु गीतं गायन्ति गर्दभाः ।**
**परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ॥**

उष्ट्रस्य रूपसौन्दर्यं सर्वैः ज्ञातम् एव । तादृशस्य कस्यचित् उष्ट्रस्य विवाहावसरे गर्दभाः गायकत्वेन गताः आसन् । गर्दभानां कण्ठस्वरस्य माधुर्यं पुनर्वक्तव्यं नास्ति खलु ? विवाहमण्डपे गायकाः गर्दभाः उष्ट्रम् अङ्गुल्या निर्दिशन्तः प्रशंसां कृतवन्तः – 'अहो रूपम् उष्ट्रवरस्य' इति । उष्ट्रः अपि गर्दभानां प्रशंसाम् अकरोत् – 'एतेषाम् अहो कण्ठमाधुर्यम्' इति । लोके अपि असमर्थयोः एतादृशी परस्परप्रशंसा क्वचित् दृश्यते एव खलु !

**अजागलस्थं स्तनमुष्ट्रपुच्छम् अण्डद्वयं वाजिगले च केशान् ।**
**वृथासृजत् साहिणिमारभूपं पूजां न लेभे भुवि पद्मयोनिः ॥**

लोके त्रिमूर्तिषु अन्यतमस्य ब्रह्मदेवस्य पूजा नास्ति । तत्र कारणं स्यात् किमपि पौराणिकम् । किन्तु कविः कश्चन वदति – "अजागलस्तनौ, उष्ट्रपुच्छम्, अण्डद्वयम्, अश्वकण्ठे केशाः, साहिणिमारनामकः राजा इत्यादीन् प्रयोजनरहितान् ब्रह्मा सृष्टवान् । अतः एव कुपिताः जनाः ब्रह्मणः पूजां त्यक्तवन्तः" इति । निष्प्रयोजकानि कार्याणि कुर्वति जने अनादरः खलु सहजः ?

## ज्ञानसरिता

### समीकरणं किमर्थम् ?



परिशुद्धं निष्पुटितं च समवस्त्रं वस्तुतः शोभां कल्पयति एव । असमीकृतवस्त्रधारिणां यावत् सौन्दर्यं ततोऽपि अधिकं सौन्दर्यं सिद्ध्येत् इतः । एतेन एव कारणेन परमालसोऽपि स्ववस्त्राणां समीकरणस्य परिश्रमं कर्तुं सिद्धः । पुटीभवनेन उत्पद्यमानानां रेखाणाम् अवरोधनाय केचन वस्त्रनिर्मातारः विशिष्टं निर्माणक्रमम् अनुसरन्ति। सामान्यायाः वस्त्रनिर्माणप्रक्रियातः तु क्षालनावसरे वस्त्राणि असुन्दराणि भवन्ति एव।

पुटीकृतेषु वस्त्रेषु उत्पन्नानां वक्ररेखाणां निवारणाय उष्णसहितं भारयुक्तं समीकरणसाधनम् आवश्यकं भवति। यदा उपविश्यते तदा, अतिपिनद्धानि वस्त्राणि यदा ध्रियन्ते तदा च वस्त्राणि असुन्दरताम् आप्नुवन्ति।

वस्त्रवयनावसरे जातस्य सूत्राणां वक्रीभवनस्य कारणेन, एकस्य सूत्रस्य उपरि अपरं सूत्रं तिष्ठति, सूत्रं स्थानच्युतिं वा प्राप्नोति इति कारणेन च वस्त्रेषु पुटीभवनसम्बद्धाः रेखाः दृश्यन्ते।

वस्त्राणि यदा समीक्रियन्ते तदा तस्मात् समीकरात् निर्गच्छतः औष्ण्यस्य स्पर्शेन सूत्रम् ऋजुत्वं प्राप्नोति, बलपूर्वकमर्दनेन पूर्वस्थितिं प्राप्तं सत् वस्त्रं सुयोग्यं दृश्यते।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **श्रवणः** | कान | ear |
| **श्रान्तिः** | थकावट | exhaustion |
| **श्रावः** | सुनना | hearing |
| **श्रेणिः** | दल | group |
| **श्रोत्रियः** | विद्वान् | scholar |
| **श्लक्ष्णः** | कोमल | soft |
| **श्वभ्रम्** | रन्ध्र | a hole |
| **श्वशुरः** | ससुर | father-in-law |
| **श्वश्रूः** | सास | mother-in-law |
| **श्वेत** | सफेद | white |
| **श्वैत्यम्** | सफेदी | whiteness |
| **संयुक्तः** | मिला हुआ | joined |
| **संयुगः** | युद्ध | battle |
| **संरक्षणम्** | रक्षा करना | protection |
| **संरब्ध** | उत्तेजित | excited |

## किं भवन्तः जानन्ति ?

**१ ) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि वर्तते ?**
(क) आदि (ख) महाप्रास्थानिक (ग) भीष्म (घ) कर्ण

**२ ) महाभारतयुद्धारम्भस्य वर्णनं महाभारतस्य कस्मिन् पर्वणि वर्तते ?**
(क) कर्ण (ख) शल्य (ग) भीष्म (घ) वन

**३ ) श्रीकृष्णस्य मुकुटे कस्य पक्षिणः पिच्छः वर्तते ?**
(क) कपोतस्य (ख) शुकस्य (ग) मयूरस्य (घ) खञ्जनस्य

**४ ) घटोत्कचः कः आसीत् ?**
(क) गन्धर्वः (ख) नागः (ग) यक्षः (घ) राक्षसः

**५ ) कृष्णस्य गुरुः कः आसीत् ?**
(क) द्रोणाचार्यः (ख) सान्दीपनिः (ग) परशुरामः (घ) कृपाचार्यः

**६ ) कृपाचार्यस्य पोषणं केन राज्ञा कृतमासीत् ?**
(क) पृषतेन (ख) शान्तनुना (ग) विचित्रवीर्येण (घ) उग्रसेनेन

**७ ) वनवाससमये युधिष्ठिरस्य तपश्चर्यया प्रसन्नः सूर्यः युधिष्ठिराय किम् अददात् ?**
(क) अमोघशक्तिम् (ख) अक्षयपात्रम् (ग) दिव्यमणिम् (घ) दिव्यरथम्

उत्तराणि – (१) ग (२) ग (३) ग (४) घ (५) ख (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

## Do you want to learn Sanskrit ?

### Here is a chance......

**Participate in**

## Sanskrit Spoken

**Programme and learn Sanskrit**

**Level 2**

**Date** : 19/07/19 to 30/10/19

**Day** : Mon-Wed-Fri

**Time** : 6.30pm to 8.00pm

**Fees** : 3000/-

- **Venue** : Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
**साम्प्रतम्**

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

**Date** : 16/6/19 to 12/4/20

**Day** : Sunday

**Time** : 11.00am to 12.30pm

**Fees** : 4500/-

## बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 16/6/19 to 12/4/20

**Day** : Sunday

**Time** : 11.00am to 12.30pm

**Fees** : 4500/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006